Pathita Siddha Sarasvata Stavah

पठितसिद्धसारस्वतस्तवः

Document Information

Text title : paThitasiddhasArasvatastavaH

File name : paThitasiddhasArasvatastavaH.itx

Category : devii, sarasvatI, devI, aShTaka

Location : doc_devii

Proofread by : Aruna Narayanan

Latest update : July 5, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2020

sanskritdocuments.org

पठितसिद्धसारस्वतस्तवः

ॐ नमः शारदायै ।
व्याप्तानन्तसमस्तलोकनिकरैङ्कारा समस्ता स्थिरा
याऽऽराध्या गुरुभिर्गुरोरपि गुरुर्देवैस्तु या वन्द्यते ।
देवानामपि देवता वितरता वाग्देवता देवता
स्वाहान्तः क्षिप ॐ यतः स्तवमुखं यस्याः स मन्त्रो वरः ॥ १॥

ॐ ह्रीं श्रीं प्रथमा प्रसिद्धमहिमा सन्तप्तचित्ते हिमा
सौं ऐं मध्यहिता जगत्त्रयहिता सर्वज्ञनाथा हिता ।
ह्रीं क्लीं ब्लीं चरमा गुणानुपरमा जायेत यस्या रमा
विद्यैषा वषडिन्द्रगीःपतिकरी वाणीं स्तुवे तामहम् ॥ २॥

ॐ कर्णे वरकर्णभूषिततनुः कर्णेऽथ कर्णेश्वरी
ह्रींस्वाहान्तपदां समस्तविपदां छेत्री पदं सम्पदाम् ।
संसारार्णवतारिणी विजयते विद्यावदाते शुभे
यस्याः सा पदवी सदा शिवपुरे देवीवतंसीकृता ॥ ३॥

सर्वाचारविचारिणी प्रतरिणी नौर्वाग्भवाब्धौ नृणां
वीणावेणुवरक्कणातिसुभगा दुःखाद्रिविद्राविणी ।
सा वाणी प्रवणा महागुणगणा न्यायप्रवीणाऽमलं
शेते या तरणीरणीसु निपुणा जैनी पुनातु ध्रुवम् ॥ ४॥

ॐ ह्रीम्बीजमुखा विधूतविमुखा संसेविता सन्मुखा
ऐं क्लीं सौं सहिता सुरेन्द्रमहिता विद्वज्जनेभ्यो हिता ।
विद्या विस्फुरति स्फुटं हितरतिर्यस्या विशुद्धा मतिः
सा ब्राह्मी जिनवक्त्रवज्रललने लीनाऽतिलीनातु माम् ॥ ५॥

ॐ अर्हन्मुखपद्मवासिनि शुभे ज्वालासहस्रांशुभे
पापप्रक्षयकारिणि श्रुतधरे पापं दहत्याशुभे ।
क्षां क्षीं क्षूं वरबीजदुग्धधवले वं वं व हं स्वावहा

श्रीवाग्देव्यमृतोद्भवे यदि भवे मन्मानसे सा भवे ॥ ६॥

हस्ते शर्मदपुस्तिकां विदधती शतपत्रकं चापरं
लोकानां सुखदं प्रभूतवरदं सज्ज्ञानमुद्रं परम् ।
तुभ्यं बालमृणालकन्दललसल्लीलाविलोलं करं
प्रख्याता श्रुतदेवता विदधती सौख्यं नृणां सूनृतम् ॥ ७॥

हंसोहंसोऽतिगर्वं वहति हि विधृता यन्मयैषा मयैषा
यन्त्रं यन्त्रं यदेतत् स्फुटति सिततरां सैव यक्षावयक्षा ।
साध्वी साध्वी शठार्या प्रविधृतभुवना दुर्धरा या धराया
देवी देवीजनार्घ्या रमतु मम सदा मानसे मानसे सा ॥ ८॥

स्पष्टपाठं पठत्येतद् ध्यानेन पटुनाऽष्टकम् ।
अजस्रं यो जनस्तस्य भवन्त्युत्तमसम्पदः ॥ ९॥

॥ इति पठितसिद्धसारस्वतस्तवः सम्पूर्णः ॥

Proofread by Aruna Narayanan

Pathita Siddha Sarasvata Stavah
pdf was typeset on July 5, 2020

Please send corrections to *sanskrit@cheerful.com*